तरुणास्थि नासावंशास्थि । मर्म्मणि शृङ्गाटके । द्वन्द्वैकत्वम् । अन्यः आगन्तुजः ॥ * ॥
भ्रंशथुमाह ।

प्रभ्रंश्यते नासिकया तु यस्य
सान्द्रो विदग्धो लवणः कफस्तु ।
प्राक् सञ्चितो मूर्द्धनि पित्ततप्ते
तं भ्रंशथुं व्याधिमुदाहरन्ति ॥

दीप्तिमाह ।

घ्राणे भृशं दाहसमन्विते तु
विनिःसरेत् धूम इवेह वायुः ।
नासाप्रदीप्तेव च यस्य जन्तो-
र्व्याधिन्तु दीप्तिं तमुदाहरन्ति ॥

प्रदीप्तेव प्रज्वलितेव ॥ * ॥
प्रतीनाहमाह ।

उच्छ्वासमार्गन्तु कफः सवातो
रुन्ध्यात् प्रतीनाहमुदाहरेत्तम् ॥

स्रावमाह ।

घ्राणाद्घनः पीतसितस्तनुर्व्वा
दोषः स्रवेत् स्रावमुदाहरेत्तम् ॥

नासाशोषमाह ।

घ्राणाश्रिते श्लेष्मणि मारुतेन
पित्तेन गाढं परिशोषिते च ।
कृच्छ्राच्छ्वसित्यूर्द्ध्वमधश्च जन्तु-
र्यस्मिन् स नासापरिशोष उक्तः ॥

प्रतिश्यायमाह । तस्य निदानं द्विविधम् । एकं सद्योजनकं तद्बलवत्त्वेन चयं नापेक्षते । यत उक्तम् ।

न केवलं चयं प्राप्य दोषाः कुप्यन्ति देहिनाम् ।
अन्यदापि हि कुप्यन्ति हेतुबाहुल्यतोरणात् ॥

हेतूनां बाहुल्येन त्वराकरणात् । अपरं चयादिक्रमेण जनकम् । चयादिक्रमो यथा । निदानात् सञ्चयः सञ्चयात् प्रकोपः प्रकोपात् प्रसरः प्रसरात् स्थानसंश्रयः । ततो व्यक्तिः । ततो भेद इति ॥ * ॥ तत्र प्रतिश्यायस्य सद्योजनकनिदानपूर्व्विकां संप्राप्तिमाह ।

संधारणाजीर्णरजोऽति भाषात्
क्रोधर्त्तुवैषम्यशिरोऽभितापैः ।
प्रजागरातिस्वपनाम्बुशीता-
वश्यायकैर्म्मैथुनवाष्पसेकैः ॥
संस्त्यानदोषैः शिरसि प्रवृद्धो
वायुः प्रतिश्यायमुदीरयेत्तु ।

सन्धारणा मूत्रपुरीषधारणा । रजो धूलिः । तच्च नासाप्रविष्टं हेतुः । ऋतुवैषम्यं ऋतुचर्य्याविपरीताचरणम् । शिरोऽभितापः शिरसोऽभितापो येन धूमादिना सः । अवश्यायस्तुषारः । वाष्पसेको रोदनम् । संस्त्यानदोषैः शिरसि संहतकफैः ॥ * ॥ चयादिक्रमजनकनिदानपूर्व्विकां संप्राप्तिमाह ।

चयं गता मूर्द्धनि मारुतादयः
पृथक् समस्ताश्च तथैव शोणितम् ।
प्रकोप्यमाना विविधैः प्रकोपणै-
स्ततः प्रतिश्यायकरा भवन्ति ह ॥

पूर्व्वरूपमाह ।

क्षवप्रवृत्तिः शिरसोऽभिपूर्णता
स्तम्भोऽङ्गमर्द्दः परिहृष्टरोमता ।
उपद्रवाश्चाप्यपरे पृथग्विधा
नृणां प्रतिश्यायपुरःसराः स्मृताः ॥

शिरसोऽभिपूर्णता शिरसो भारेणेव व्याप्तिः । अपरे पृथग्विधाः घ्राणधूमायनतालुविदारणनासामुखस्रावादयो विदेहोक्ता बोद्धव्याः ॥ * ॥
वातिकस्य प्रतिश्यायस्य लक्षणमाह ।
आनद्धापिहिता नासा तनुस्रावप्रसेकिनी ।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥
क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च ।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके ॥
आनद्धा स्तब्धा । अपिहिता न पिहिता । अत एव तनुस्रावप्रसेकिनी ॥ * ॥
पैत्तिकमाह ।
उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके ।
कृशोऽतिपाण्डुः सन्तप्तो भवेदुष्णाभिपीड़ितः ।
नासया तु सधूमाग्निं वमतीव स मानवः ॥
सपीतकः ईषत्पीतकः ॥ * ॥
श्लैष्मिकमाह ॥
घ्राणात् कफकृते श्वेतः कफः शीतः स्रवेद्बहुः ।
शुक्लावभासः शूनाक्षो भवेद्गुरुशिरा नरः ॥
गलताल्वोष्ठशिरसां कण्डूभिरतिपीड़ितः ॥ * ॥
सान्निपातिकमाह ।
भूत्वा भूत्वा प्रतिश्यायो योऽकस्मात् सन्निवर्त्तते ।
संपक्वो वाप्यपक्वो वा स सर्व्वप्रभवः स्मृतः ॥
अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथापि तानि ज्ञेयानि त्रिदोषजत्वात् । अयमसाध्यः । अतएवाह ।
नृणां दुष्टः प्रतिश्यायः सर्व्वजश्च न सिध्यति ॥
दुष्टप्रतिश्यायलिङ्गमाह ।
प्रक्लिद्यति मुहुर्नासा पुनश्च परिशुष्यति ।
पुनरानह्यते वापि पुनर्विव्रियते तथा ॥
निःश्वासो वाति दुर्गन्धो नरो गन्धान् न वेत्ति च ।
एवं दुष्टं प्रतिश्यायं जानीयात् कृच्छ्रसाधनम् ॥
आनह्यते विबद्धा भवति । विव्रियते अविबद्धा स्यात् । क्लेदशोषविबन्धा नैककालं भवन्ति किन्तु यदा यदा यद्यत् दोषाधिक्यं भवति तदा तदा तत्तद्दोषकृतः स स बोद्धव्यः इति न विरोधः । कृच्छ्रसाधनं असाध्यं कष्टसाध्यञ्च ॥ * ॥
रक्तजमाह ।
रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते ।
पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः ॥
ताम्राक्षश्च भवेत् जन्तुरुरोघातप्रपीड़ितः ।
दुर्गन्धोच्छ्वासवक्त्रश्च गन्धानपि न वेत्ति सः ॥
उरोघातप्रपीड़ितः उरोघातेनेव प्रपीड़ितः ॥
अप्रतीकारेण कालान्तरे सर्व्व एव प्रतिश्याया असाध्या भवन्तीत्याह ।
सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः ।
दुष्टतां यान्ति कालेन तदासाध्या भवन्ति हि ॥
प्रतिश्यायेषु कृमयोऽपि भवन्तीत्याह ।
मूर्द्धन्ति कृमयश्चात्र श्वेताः स्निग्धास्तथाणवः ।
कृमितो यः शिरोरोगस्तुल्यं तेनात्र लक्षणम् ॥
अत्र एषु प्रतिश्यायेषु कफस्य प्राधान्यात् सर्व्वेषु प्रतिश्यायेषु कफजा एव कृमयो भवन्तीति ॥ * ॥ श्वेताः स्निग्धाश्च वृद्धाः प्रतिश्याया अपरानपि विकारान् कुर्व्वन्ति तानाह ।
बाधिर्य्यमान्ध्यमघ्रत्वं घोरांश्च नयनामयान् ।
शोथाग्निमान्द्यकासांश्च वृद्धाः कुर्व्वन्ति पीनसम् ॥
घोरांश्च नयनामयान् इति वचनेऽप्यान्ध्यग्रहणं विशेषार्थम् । अघ्रत्वं न जिघ्रतीत्यघ्रस्तस्य भावः अघ्रत्वम् ॥ * ॥ चतुस्त्रिंशत्संख्यापूरणायाह ।
अर्ब्बुदं सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्व्विधम् ।
चतुर्व्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः ॥
अर्ब्बुदानि सप्त वातपित्तकफसन्निपातरक्तमांसमेदोजानि । शोथाश्चत्वारो वातपित्तश्लेष्मसन्निपातजाः । अर्शांसि चत्वारि वातपित्तश्लेष्मसन्निपातजानि । रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्निपातजानि । एतानि यथोक्तलिङ्गानि घ्राणेऽपि सम्भवन्ति ॥ * ॥ चिकित्साभेदात् पीनसस्यामस्य लक्षणमाह ।
शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः ।
क्षामः ष्ठीवति चाभीक्ष्णमामपीनसलक्षणम् ॥
नासास्रावस्तनुस्वरः क्षाम इत्यन्वयः ॥ * ॥
अथ पक्वस्य पीनसस्य लक्षणमाह ।
आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम् ॥
आमलिङ्गान्वितः श्लेष्मा आमलिङ्गैः शिरोगुरुत्वादिभिर्युक्तः पश्चात् घनः निविड़ः अपच खेषु नासारन्ध्रेषु निमज्जति सक्तो भवति । वर्णविशुद्धिः श्लेष्मणः प्रकृतिवर्णता ॥ * ॥
अथ नासारोगाणां चिकित्सा ।
सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु ।
मरिचं गुड़ेन दध्ना भुञ्जीत नरः सुखं लभते ॥ १ ॥
कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी ।
एषां चूर्णं कषायं वा दद्यादार्द्रकजै रसैः ॥
पीनसे स्वरभेदे च नासास्रावे हलीमके ।
सन्निपाते कफे वाते कासे श्वासे च शस्यते ॥ २ ॥
कलिङ्गहिङ्गुमरिचलाक्षासुरसकट्फलैः ।
कुष्ठोग्राशिग्रुजन्तुघ्नैरवपीड़ः प्रशस्यते ॥
पीनसादिषु ॥ ३ ॥
व्योषचित्रकतालीशतिन्तिड़ीकाम्लवेतसम् ।
सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम् ॥
व्योषादिकमिदं चूर्णं पुराणगुड़मिश्रितम् ।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम् ॥
इति व्योषादिवटी ॥ ४ ॥
व्याघ्रीदन्तीवचाशिग्रुसुरसाव्योषसिन्धुजैः ।
सिद्धं तैलं नसि क्षिप्तं पूतिनस्यगदापहम् ॥
इति व्याघ्रीतैलम् ॥ ५ ॥
शिग्रुसिंहीनिकुम्भानां बीजैः सव्योषसैन्धवैः ।
बिल्वपत्ररसैः सिद्धं तैलं स्यात् पूतिनस्यनुत् ॥
निकुम्भा दन्ती । पूतिनस्यनुत् नस्यात् । इति शिग्रुतैलम् ॥ ६ ॥